Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ श्रीकराष्टाक्षरमन्त्रप्रसङ्गात् श्रीकरलक्ष्मीनारायणमन्त्रोपि लिख्यते-

ब्रह्मा ऋषिः। गायत्री छन्दः। लक्ष्मीनारायणो देवता। श्रामित्यादि षडङ्गम्। अथवा, ओं लं पुण्डरीकाक्षपरमेश्वराय नमः हृत्। ओं क्ष्मीं सकल-सुखश्रीभाग्यनिधये शिरः। ओं नां वाञ्छितसिद्धिप्रदाय नमः शिखा। ओं रां अखिलदुःखशमनाय नमः कवचम्। ओं यं आनन्दसुन्दरलक्ष्मीपतये नमः नेत्रम्। ओं नां लक्ष्मीनारायणाय नमः अस्त्रम्। ध्यानम्—

लक्ष्मीचारुकुचद्वन्द्वकुंकुमाङ्कितवक्षसे।
नमो लक्ष्मीपते तुभ्यं सर्वाभीष्टप्रदायिने॥

ध्यानान्तरम्—

हस्तैर्बिभ्रत्सरसिजगदाशङ्खचक्राणि विद्यां
पद्मादर्शौ कनककलशं मेघविद्युद्विलासम्।

वामोत्तुङ्गस्तनमविरलाकल्पमाश्लेषमोहात्
एकीभूतं वपुरवतु नः पुण्डरीकाक्षलक्ष्म्योः॥

ओं ऐं श्रीं ह्रीं क्लीं लक्ष्मीनारायणाय नमः इति चतुर्दशाक्षरो मन्त्रः। ऐश्वर्यप्रधानोयं मन्त्रः॥